# अथर्ववेदीया कृषिस्तत्साधनं वृष्टिश्च

**Bhartendu Pandey**

Nanchand-English-Sanskrit College, Merrut

***Abstract***

*There is a great importance given to agriculture in Vedas. A rishi, the believer of this fact that every worldly pleasure i.e. wife, a cattle etc. lies in agriculture. Through this very famous Rik "Krishimit Drishasva" in reality inspires the whole humanity to involve itself in agriculture. Going into the studies of Atharvaveda it seems that agriculture was adopted as a means of living by other sections of the society too along with Vaishyas. As an instance use of ploughs and yokes by "Kavies" (Medhavies) i.e. eminent scholars is discussed there. These above mentioned 'Kavies' may be taken as Brahmins. In this way keeping in view the class system much emphasis is laid on agriculture in Atharvaveda in the different way than that of Smrities. Keeping social systems in view there was a great significance of agriculture for which water was an essential necessity and the main source of water then was rain in Atharvaveda.*

*The creator of this universe created the rain for the creation only. First of all botany takes place on the earth due to the rains and this is the most important role of the rain in agriculture. The growth of seeds is possible only then when water is mixed into it. Harvest is possible through this process only. This is discussed in several Mantras in Atharvaveda.*

*Although many sources of water are described in Atharvasamhita but the utmost importance is given to "The Rain". Whether there are stationary living bein-trees etc. or moving thisn-birds, animals ect., the rain has its importance directly and indirectly both. Therefore, the rain in Atharvaveda is worshipped as creator of life in the creation on the earth.*

वेदेऽतीव कृषेर्महिममयी विद्यते स्थितिः। तत्र (कृष्याम्) एव जायागवादीनि अखिलजीवनसुखप्रदानि रमणीयानि साधनानि सन्तीति मन्वानेन ऋषिणा "कृषिमित् कृषस्व"[१] इत्यनेन ऋगंशेन विश्वविश्रुतेन वस्तुतोऽखिलैव मनुष्यंता कितवव्याजतः कृषिकर्मण एवाभिप्रेरिता। अथर्ववेदं वीक्ष्य प्रतिभासते यत् तत्र कृषिः वैश्येतरैरपि (सम्भवतो ब्राह्मणैरपि) आचर्यमाणाऽस्ति यतस्तात्र कविभिर्मेधाविभिर्वा लाङ्गलप्रयोगो युगवितानश्च क्रियमाणतयाऽभिवर्णितौ।[२] कवयश्चैते ब्राह्मणत्वेन संभावयितु शक्याः। इत्थं लभ्यते यद् वर्णव्यवस्थादृष्ट्याऽपि अथर्ववेदे स्मृतिवैसादृश्येन[३] भूयो महत्त्वं कृषये सामाजिकजीवनसन्दर्भेऽर्पितमस्ति। सामाजिकादिदृष्ट्या अतिप्राशस्त्यशालिनि अथर्ववेदीये कृषिकर्मणि स्वाभाविकरूपेण अपां वृष्टिजानां काऽपि महत्येव भूमिका निरूपिता दृश्यते।

अथर्ववेदे वृष्ट्याः व्यापकं विवरणं विवृतं मिलति। परम्, प्रतीयते यद् वृष्टिकृता भूमेस्तर्पण-तोषसमृद्ध्यादय एव तत्रत्ये ऋषिभ्यो रोचन्तेतराम्, तद्यथा-

१. 'वाश्रा आपः पृथिवी तर्पयन्तु।'[४]

२. 'वर्षस्य सर्गा महयन्तु भूमिम्।'[५]

३. 'सर्गा वर्षस्य वर्षतो वर्षन्तु पृथिवीमनु।'[६]

इयं वृष्टिविहिता भूम्यास्तृप्त्यादिः तृणरूपेण[७] ओषधिवीरुधादिरूपेण[८] च प्रतिफलति (यत्तु भूम्याम् अन्यप्राणवत्-सृष्टिपुष्ट्यादिनिर्वाहकं कारणम्) इत्येतस्मादेव अथर्ववेदे वर्षणं प्राणत्वेन तद्वर्षणत्वेन वा परिकल्प्यते।[९] तात्पर्यमिदं यत् वृष्टि-देव-भूत-पर्जन्य-प्रदत्तप्राणैरेव पृथ्वी प्राणिनः प्रसूते पुष्णाति च। हेतोरेतस्मादेव ऋषिरथर्वा भूमेर्मातृत्वं पितृत्वं च पर्जन्यस्य साक्षात्करोति।[१०] पर्जन्यगतपितृत्वप्रवर्तितपृथिवीमातृत्वमेव कृषिर्नान्यत्। पुनश्च अथर्ववेदीयभूमिसूक्तान्तर्वर्तिनि सुप्रसिद्धे 'माता भूमिः'[११] इत्यादौ मन्त्रभागे भूम्यादेर्मातृत्वादि प्रतिपाद्य यदि पर्जन्यः 'स उ नः पिपर्तु'[१२] इत्येवं वर्षणेन पालनाय प्राथ्र्यते, तर्हि स्पष्टमेव कृषौ (अर्थात् भूमेर्मातृत्वे पर्जन्यस्य पितृत्वे च) वृष्टिरेव मूले तिष्ठति।

अस्तु, अन्यथा सामान्यत्वेन (अर्थात् कृषिसन्दर्भविशेष-नैरपेक्ष्येण) अपि व्यापकं विशदं च वर्णनं वृष्ट्या दृश्यतेऽथर्ववेदे,

Vijnana Bharati

तत्र वृष्टेरुपादानानां वारिवारिदविद्युन्मरुदादीनां प्राण्यप्राणिषु तत्प्रभावानाञ्च प्रभावि प्रतिपादनं परिलभ्यते। तत्र तत्तद्वर्णनगताः स्वाभावोक्तयः सन्मनांसि सतामारुह्य वेदस्य परमपुरुषकृतकवितात्वमेव कृतार्थयति वस्तुतः। अपरत्र वृष्टेः सम्पूर्णविज्ञानमपि विशदं विविच्याथर्ववेदो वेदस्य समस्तसत्यविद्यास्रोतोभूतपुस्तकत्वमपि अभिव्यनक्ति। तद्यथा–

'समुत्पतन्त प्रदिशो समभ्राणि वातजूतानि यन्तु।

महऋषभस्य नदतो नभस्वतो वाश्रा आपः पृथिवीं तर्पयन्तु।।'[१३]

इत्ययं मन्त्रो नभसो भुवं यावत् विस्तीर्णस्वरूपायाः वृष्टिघटनायाः व्यापकं किमपि चित्रमुट्टङ्कयति। यत्र घनाच्छना दिशः वारिदसञ्चलनं वातविहितम्, मेघानां सगुरुता गर्जत्ता, तादृग्भ्यश्च तेभ्यो मेघेभ्योऽपां भूमौ सर्पणं, तत्तर्पणम् इत्यादि कियता स्वाभाव्येन समाहितम्। एवमेव

'आशामाशां वि द्योततां वाता वान्तु दिशो दिशः।

मरुद्भिः प्रच्युता मेघाः सं यन्तु पृथिवीमनु।।'[१४]

इत्यस्मिन् मन्त्रे प्रतिदिशं विद्युद्वातानां वृष्ट्युपादानाम् 'आपो विद्युदभ्रं वर्षं सं वोऽवन्तु सुदानव उत्सा अजगरा उत।

मरुद्भिः प्रच्युता मेघाः सं यन्तु पृथिवीमनु।।'[१५]

इत्यत्र चान्यासामपि तत्सम्बद्धसामग्रीणां ग्रथनमस्ति।

तथा च–

'अभिक्रन्द स्तनयार्दयोदधि भूमिं पर्जन्य पयसा समङ्ग्धि।'

त्वया सृष्टं बहुल मैतु वर्षमाशारैषी कृषगुरेत्वस्तम्।।[१६]

इत्येतस्मिन् छन्दोवाक्ये वृष्टिजः सूर्योपरि[१७] यः प्रभावः, स कियद् हृद्यतया वर्णितः?

इत्थमेव–

'संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः।

वाचं पर्जन्यजिन्वितां प्र मण्डूका अवादिषुः।।'[१८]

तथा–

'उपप्रवद माण्डूकि! वर्षमा वद तादुरि।

मध्ये ह्रदस्य प्लवस्व विगृह्य चतुरः पदः।।'[१९]

इत्यनयोराथर्वणवृष्टिसूक्तगतयोर्मन्त्रयोः पर्जन्यप्रेरितं मण्डूकानां वाग्विजृम्भणं, तेषां वर्षाभिः सह सम्बन्धो गाढः, (वृष्ट्या पूरिते) ह्रदे तत्प्लवनं चेत्यादि वर्तते वर्णितम्। अवधेयमस्ति यद् मण्डूका अनियततापिनो भवन्ति प्राणिनः तथा च एतदात्मीयमनियततापित्वं सम्मुखीकर्तुम् ते प्रावृषं विहाय संवत्सरे प्रायः पर्याप्तकालं सुषुप्तिमिव गता एव भवन्ति। उपरि मन्त्रस्य 'संवत्सरं शशयाना ब्राह्मणा' इत्यंशे संभवत उपमानमाध्यमेन तथ्यं तदेव हि संकेत्यमानं भवति। इत्थं च वक्तुं संगच्छते यन् मण्डूकगता सूक्ष्मा स्वाभाविकी चैतादृशी न शीघ्रं सुलभायते सदुक्तिः।

नाथर्वणे वेदे वृष्टेः केवलं स्वाभाविकं साहित्यिकं वोपलभ्यते चित्रम् प्रत्युत निखिलज्ञानदेहेन तेन समुद्घाट्यते प्रकृतगतं वास्तवं विज्ञानमपि। तद्यथा–

'शुनासीरेः स्म मे जुषेथाम्।

यद्दिवि चक्रथुः पयस्तेनेमामुप सिञ्चतम्।'[२०]

इत्यत्र ज्ञाप्यते यद् वाय्वादित्याभ्यामेव'[२१] आकाशे पयः (पयोदगतम्) सृज्यते, अतस्तावेव एतत्पृथ्वीसेचनाय मन्त्रे प्राथ्र्येते। एकस्मिन्नन्यस्मिन्नप्येतादृशि वेदवाक्ये मरुतः सूर्योष्मणा समुद्रगतः मेघोदीरणाय तदुत्पातनाय च स्तूयन्ते।[२२] अन्येष्वपि मन्त्रेषु बहुषु उक्तविधं प्रतिपादनं सुमुखरं प्राप्यते।[२३]

द्रष्टव्यमेव, वृष्टिकृते प्रकृतिगतास्तिस्त्र एव शक्तयो भवन्ति निर्णायिकाः–पृथिवीस्थं पयः तत्रत्यसमुद्रादिजलस्रोतोगतम्, वायुरन्तरिक्षस्थः, आदित्यश्च द्युलोकवर्त्ती। प्रथमं पृथिवीस्थं पयः सूर्योष्मणा वाष्पीकृत्य द्रवावस्थातो वायुवदवस्थान्तरं नीयते, पुनस्तद्रूपं तद् (पयोऽवस्थान्तरितम्) वायुना आत्मसात्कुर्वता पयोदाकारीकृत्य व्योम्नि क्रियते, आवश्यकं सञ्चाल्यतेऽन्ततोऽभिप्रेर्यतेऽपि पुनर्द्रवीभूय वर्षणाय पृथिवीं प्रति। एतदखिलमपि वृष्टिविज्ञानं वैज्ञानिका विगतशताब्देष्वेव अनुसन्धातुं प्राभवन् तत्तु अनादिकालादेव उपर्युक्तेषु आथर्वणेषु सन्दर्भेषु सुस्पष्टं दृश्यते।

वृष्टिः सृष्ट्या एव सृष्टा सृष्टिकर्त्रा सामान्यतः। तत्रापि प्रथमं वानस्पतिकी ओषधिवीरुधादिरूपैव सृष्टिर्भवति। अयमेव कृषावुपयोगो वर्षणस्य। वनस्पतीनां प्रतिकोशमेव आपोऽनुस्यूता भवन्ति। वृष्टिरेव चापां मुख्यमापूरकं स्रोतो भवति यतो गिरिसरित्कूपताटकान्योत्सादिगताः सर्वा एव आपः साक्षात् परम्परया वा तज्जा एव स्युः। अस्तु, कृषिकर्मणि भूम्यामुप्तात् बीजादपि अग्रे सृष्टिस्तदैव वर्द्धतेऽङ्कुरप्ररोहादितया, यदा तत्र (बीजे) इमा आपः सचन्ते समवयन्ति वा। अनयैव प्रक्रियया या का अपि सर्वा ब्रीहियवप्रभृतय ओषधि–वीरुधाद्या भुवि भवन्ति। इत्थम्, वृष्टिधारासंपात एव समसमुत्पादनिबन्धनं वनस्पतीनां विश्वेषाम्। तथ्यमेतद्धि अथर्ववेदेऽनेकैर्मन्त्रैर्विवृतं वर्तते।[२४]

उक्तस्य न विद्यतेऽभिप्रायोऽयं कथमपि यत् तत्राथर्वणे वेदे

केवलं वृष्टिजन्यमेव जलमवगतम्, अतस्तदेव तत्र बहुशः स्तूयते। वस्तुतोऽतो भिन्नतया पार्वतानाम्, उत्स्त्यानाम्, अन्याभिः सह खननादुद्धतानामपि अपां शंकारिता निरूप्यमाणा वर्तते।[२५] परं सा (शंकारिता सुखकारिता वा) ब्रीहियवाद्युत्पादद्वारा यतो वर्ष्याभ्य एवाद्भ्यः अधिकास्ति तथा चोक्तानामपि पार्वतीनामपां मूलं वर्ष्यमेव जलं भवति।। अतोऽर्थवेदे वृष्टिजा एवापोऽधिकं स्तूयन्ते।

इत्थम्, अथर्ववेदीयायां कृषावकृषौ वा सत्स्वपि अन्यजलसाधनेषु वर्ष्यणामेव जलानां स्थानं सर्वातिशायि महत्त्वभाजनमस्ति। यद्यपि वर्षाः स्थावरैः सह जङ्गमानामपि तिर्यङ्मनुष्यादीनां साक्षाज्जीवनसाधनम्, तथापि फलान्नादि-स्थावरमाध्यमेन परम्परयाऽपि तासां (वर्षाणाम्) तत्प्राणप्रदता। एतेनैव वर्षास्तत्राथर्ववेदे प्रजाप्राणत्वेनाभिधीयन्ते स्तूयन्ते च पृथिवी-तर्पणाय ओषध्यानन्दनाय च।[२६]

***सन्दर्भ :***


१. ऋग्वेदः १०/३४/१३
२. 'कवयः। मेधाविनामैतत्। मेधाविनो जनाः।' उक्तस्य सायणभाष्यम्।
३. श्रीमद्भगवद्गीता, १८/४४
४. अथर्ववेदः, ४/१५/१
५. अथर्ववेदः ४/१५/२
६. अथर्ववेदः ४/१५/४
७. 'वृष्टिरेव तृणम्' अथर्ववेदः, ६/५४/०१
८. अथर्ववेदः ४/१५/२
९. अथर्ववेद, ४/१५/१०
१०. अथर्ववेद, १२/१/१२, १२/१/१०, १२/१/६३
११. अथर्ववेद, १२/१/१२
१२. अथर्ववेद
१३. अथर्ववेद, ४/१५/१
१४. अथर्ववेद, ४/१५/८
१५. अथर्ववेद, ४/१५/९
१६. अथर्ववेद, ४१५/६
१७. अथर्ववेदः, ४/१५/१३
१८. अथर्ववेदः, ४/१५/१३
१९. अथर्ववेद, ४/१५/१६
२०. अथर्ववेद, ३/१७/७
२१. अथर्ववेदः, (३/१७/५) इत्यस्य सायणभाष्यम्।
२२. अथर्ववेदः, ४/१५/५
२३. अथर्ववेदः, ६/२२/३
२४. अथर्ववेद, ४/१५/२,११/४/१७
२५. अथर्ववेद, १९/२/१-२
२६. अथर्ववेद, ४/१५/१६


Vijnana Bharati